श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्री श्रीनिवासरामानुजमहादेशिक मङ्गळम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री श्रीनिवासरामानुजमहादेशिक मङ्गळम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।

वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

आचार ज्ञान वैराग्य निधये नित्य बन्धवे।
श्रीनिवासाख्य गुरवे नमो वाकमधीमहे॥ १ ॥

श्रीनिवास गुरु प्राप्त शास्त्र सार्वज्ञ शालिने।
श्रीनिवास लक्ष्मणाख्याय गुरवे भूरि मङ्गळम्॥ २ ॥

श्रीमत्सार बुभुत्सूनां बोधाय प्रिय काम्यया।
तत्सारसार सन्धात्रे सारज्ञायास्तु मङ्गळम्॥ ३ ॥

निवासतरवे नित्यं भक्तानां नित्यबन्धवे।
निर्णीतपरमार्थाय नित्यं भवतु मङ्गळम्॥ ४ ॥

वादिसिंहगुरुप्रोक्त पादुस्तोत्र प्रवेशिनाम्।
हिताय भाषाव्याख्यान दायकायास्तु मङ्गळम्॥ ५ ॥

सनकादि समानाय सन्धात्रे स्तोत्रवारिधेः।
अजात शत्रवे सर्व प्रियचित्ताय मङ्गळम्॥ ६ ॥

राजत्फाल लसत्पुण्ड्र शोभिने शुद्धचेतसे।
रसोक्तिपूर्णकृतये कविमुख्याय मङ्गळम्॥ ७ ॥

मानमेयरसज्ञाय मतानां मार्ग दर्शिने।
मातृकल्पाय शिष्याणां मानदायास्तु मङ्गळम्॥ ८ ॥

नुताय सर्वैस्सततं स्थिताय आचार वर्त्मनि।
मताय सर्व लोकानां नुतरामाय मङ्गळम्॥ ९ ॥

जगद्रक्षण दीक्षस्सः रामानुजमुनिस्स्वयम्।
यद्रूपेण अवतीर्णोऽत्र तस्मै भवतु मङ्गळम्॥ १०॥

मुनये जित चित्ताय मुक्तिमार्ग प्रदर्शिने।
त्रिदण्ड विलसद्दोस्स्थ चतुस्सूत्राय मङ्गळम्॥ ११॥

नय व्याकृति शास्त्राणां वेत्रे ज्ञान जितारये।
मीमांसा युग्म पाथोधि मन्दरायास्तु मङ्गळम्॥ १२॥

ये मुक्तिकामा यस्याङ्घ्रिं प्राप्यापुः सर्वशेषिणम्।
सदा सन्तृप्त चित्ताय सर्वज्ञायास्तु मङ्गळम्॥ १३॥

नाधिकं ब्रुवते नाति न्यूनवाचे नय अक्षिणे।
सर्वलोक प्रियायास्तु सदा पूर्णाय मङ्गळम्॥ १४॥

मकारार्थ हितायैव अवतीर्णाय महात्मने।
श्रीवास लक्ष्मणाख्याय दयावारिधये नमः॥ १५॥

॥ इति श्री श्रीनिवासरामानुजमहादेशिक मङ्गळं संपूर्णम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥